## डेक्कनकॉलेजपदव्युत्तरसंशोधनसंस्था
## मानितविश्वविद्यालयः
## पुणे ४११००६
## संस्कृतकोशशास्त्रविभागः
## विद्यावाचस्पतिपदवीप्रवेशपरीक्षा
## १६ नोव्हेंबर २०२२

---

**समयः : अपराह्णे १२.३०तः २ पर्यन्तम्** **गुणाः ५०**

**सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः ।**

### प्रथमो विभागः - १० गुणाः

**उत्तराणि लिखत ।**

१. 'उपकृष्णम्'- इत्यस्य सनामनिर्देशं समासविग्रहं कुरुत ।

२. वाक्यं रसात्मकं काव्यम् - इति कस्य उक्तिः ।

३. लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः - इत्यत्र कोऽलङ्कारः ।

४. 'कुर्वन्ति' इत्यत्र को धातुः कश्च प्रत्ययः ।

५. सहसा विदधीत न क्रियामविवेकः परमापदां पदम् - इत्येषा पङ्क्तिः कस्मिन् काव्ये वर्तते ।

६. के द्वे ब्राह्मणे ऋग्वेदसंबद्धे ।

७. योगदर्शनस्य अष्टाङ्गानि लिखत ।

८. सांख्यदर्शने प्रकृतेः कति गुणाः । के च ते ।

९. मिताक्षरा इति कस्याः स्मृतेः टीकाग्रन्थः ।

१०. अद्वैतवेदान्तस्य साधनचतुष्टयं लिखत ।

### द्वितीयो विभागः - गुणाः २०

**चतस्रः टिप्पणीः लिखत ।**

१. भासनाटकचक्रम् ।

२. ऋग्वेदे इन्द्रः ।

३. ईशावास्योपनिषद् ।

४. कौटिलीयम् अर्थशास्त्रम् ।

५. शिक्षाशास्त्रम् ।

६. भगवद्गीतायां स्थितप्रज्ञलक्षणानि ।

**तृतीयो विभागः - गुणाः २०**

**एकं विषयम् अधिकृत्य निबन्धः लेखनीयः ।**

१. वैदिकभाषायाः विशेषाः ।

२. मम्मटोक्तानि काव्यस्य प्रयोजनानि ।

३. महाभारतमहाकाव्यम् ।

*****